Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:8(1), August 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

# मेघसन्देशकाव्ये अर्थान्तरन्यासालङ्कारः

**Borugadda Sukanya**
Lecturer in Sanskrit,
MOC College,
Jillelamudi

## प्रस्तावना

**काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।**
**सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे॥**[1]

- इति काव्यानां बहुप्रयोजनकत्वं आलङ्कारिकैः उद्घोषितम्। पाठकाः एवं विधानां प्रयोजनानां प्राप्तये सहस्राधिकश्लोकयुक्तेषु महाकाव्येषु राव श्रद्धालवः भवन्ति। सुलभतया पाठ्ये लघुकाव्ये तेषामादरः अल्पीयानेव किन्तु कानिचन खण्डकाव्यानि महाकाव्य तुल्यप्रयोजनकानि महाकाव्यतुल्यस्कन्धानि च वर्तन्ते। एवं विधेषु लघुकाव्येषु कालिदासस्य मेघसन्देश काव्यम् आद्यं सर्वमहत् च वर्तते।

---

1) काव्यप्रकाश: - प्रथमोल्लासः - 2 श्लोकः - Page No. 6.

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:8(1), August 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

प्रायश: महाकवयः उपदेशं न साक्षात् बोधयन्ति कथांशेन मिश्रितं कृत्वा कर्तव्यमुपदिशन्ति। तदा ईषत् कटुतया दृष्टोऽपि उपदेश: हृद्यः, आचरणीयश्च भवति। कालिदासोऽपि स्वकाव्ये एवंविधोपशदेशकरणेच्छया अर्थान्तरन्यासालङ्कारान् पञ्चदशाधिकश्लोकेषु प्रयुज्य सामाजिकं हितं बहुधा बोधितवान्।

अर्थान्तरन्यासालङ्कारोऽपि कथांशेन मिश्रितः हितोऽपि प्रियङ्करः आस्वाद्यश्च भवति। यदाहुः

**स्वादुकाव्यरसोन्मिश्रं शास्त्रमप्युपयुज्यते।**
**प्रथमालीढमधवः पिबन्ति कटु भेषजम्।।**[2]

लोके अनुभूतस्य विषयस्य दृष्टान्तकरणेन बोद्धयोऽर्थः सुखं ज्ञेयो भवति एवं बोद्धव्यार्थ पुनश्चरणेन उपदेश: स्मारितो भवतीति एकक्रिया द्वयर्थकरी।

---

2) काव्यालङ्कार: (भामहः) - प्रथमपरिच्छेद: - 15 श्लोक: Page No.4.

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:8(1), August 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

**अर्थान्तरशब्दार्थः / अर्थान्तरन्यासशब्दार्थः**

अर्थ: = प्रयोजनं, द्रव्यं च, अन्योऽर्थ: = अर्थान्तरम् मयूरव्यसकादयश्च (2-1-72) इति नित्यसमासः। न्यासः = समर्थनम्, अर्थान्तरेण न्यासः अर्थान्तरन्यासः इति अलङ्कारः अन्वर्थ नामक:। कालिदासः अर्थान्तरन्यास मुखेन सामाजिकान्, वैय्यक्तिकान् मनसः विश्रान्ति दायिकान् आरोग्य सूचकान् च बहून् विषयान् मेघसन्देशकाव्ये निरूपितवान्। तथाविधानां केषाञ्चित् अर्थान्तरन्यासालङ्काराणां निर्देशने प्रयोजनं अत्र निबन्धे निरूपितम्।

**(A) अर्थान्तरन्यास मुखेन सामाजिकहितोपदेशः**

समाजे कीदृशा वर्तनेन जीवितं सुखं नेतुं शक्यमिति यक्षवाक्येषु अर्थान्तरन्यासमुखेन कालिदासः बहुधा बोधयति।

"अल्पश्रयो न कर्तव्यः कर्तव्यो महदाश्रयः" इति लोकोक्तिः केचन आपत्सु नष्ट ज्ञाना: अयोग्यमपि अर्थयित्वा आपदः तर्तुं

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:8(1), August 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

यतन्ते। किन्तु दाता स्वयमयोग्यः इति हेतोः तस्मादभीष्टं न प्राप्नुवन्ति प्रत्युत निष्ठुरैः वाक्यैः तेन पराभूताः अपि भवन्ति। योग्यः अर्थितः शक्तः चेत् सहायकारको भवति। अन्यथा मृदुभिरेव वाक्यैः अर्थिनः मनः यथा न खिन्नं भवति तथा स्वस्य अशक्ततां आविष्करोति। दाता दुर्जनः चेत् दत्वापि निष्ठुर वाक्यैः अर्थिनं पराभवति ततः प्राप्तावज्ञः अर्थी लब्धकांमोऽपि खिन्नो भवति इति पूर्वोक्तां लोकोक्तिं कथांश मिश्रणेन अर्थान्तरन्यासमुखेन कविः एवं समर्थयति।

**जातं वंशे भुवनविदिते पुष्कलावर्तकानां**
**जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः।**
**तेनार्थित्वं त्वपि विधिवशाद्दूरबन्धुर्गतोऽहं**
**याञ्चामोघा वरमधिगुणे नाथमे लब्धकामा।।**[3]

यक्षः प्रियायै सन्देशं नेतुं मेघं प्रार्थयते। त्वं सर्वश्रेष्ठे पुष्कलावर्तक नामके मेघवंशे जातः ततः कुलीनः इन्द्रस्य रूपान्तरं

---

3) मेघसन्देशः - प्रथमसर्गः - 6 श्लोकः Page No.9.

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:8(1), August 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

ततः त्वामभ्यर्थये त्वया अहं तिरस्कृतोऽपि लाघवदोषं न प्राप्नोमि इति अर्थान्तरन्यासेन वक्ति।

एवं दातापि योग्यं मित्रं अर्थिनं वा न तिरस्कुर्यात् क्षुद्रस्वभावोऽपि अर्थिनं तिरस्कर्तुं नार्हति। उदारस्वभावः सर्वथा अर्थिनं न तिरस्कुर्यादिति दातृनपि उपदिशति। यथा आम्रकूटः पर्वतः वर्षेण दवाग्निं शमयित्वा उपकारकं मेघ न तिरस्करोति इति निरूपयितुं दातृविषयकं अर्थान्तरन्यासं एवमुपदिशति।

**त्वामासार प्रशमित वनोपप्लवं साधु मूर्ध्ना**
**वक्ष्यत्यध्वाश्रमपरिगतं सानमानाम्रकूटः।**
**न क्षुद्रोपि प्रथमसुकृतापेक्षया संश्रयाय**
**प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः॥**[4]

एवं सज्जनै बोधितः दातापि किमनेन दानेन मे प्रयोजनमिति पर्यनुयोगं न कुर्यादिति आशयेन सर्गान्ते पुनः तमपि प्रश्नं अर्थान्तरन्यासमुखेनैव एवं समादधे -

---

4) मेघसन्देशः - प्रथमसर्गः - 12 श्लोकः Page No.17

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:8(1), August 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

**तं चेद्वायौ सरति सरलस्कन्धसंघट्टजन्मा**
**बाधे तोल्काक्ष पित चमरीवालभारो दवाग्निः।**
**अर्हस्येनं शमयितुमलं वारिधारासहस्रै**
**शपन्नार्तिप्रशमनफलाः सम्पदोह्यचुत्तमानाम्॥**[5]

## (B) अर्थान्तरन्यासमुखेन वैय्यक्तिक हितोपदेशः

संसारे प्रवृत्तस्य प्राणिनः प्रतिव्यक्ति या कापि समस्या भवत्येव तया समस्यया सः दुखी भवति। विशेषतः प्रियजनवियुक्तः अन्यथावृत्तिचेतस्कः भवति। तथाविधस्य प्राणिनः कदाचित् दुखेन अनिष्टं मरणादिकमपि सम्भाव्यं भवेत। तथाविधाः सर्वथा व सर्वदा च समाश्वासनेन स्वस्थमनस्का: करणीया: इति अर्थान्तरन्यास मुखेन कविः शुभं उपदिशति।

अलकायां पतिव्रता यक्षपत्नी मृतप्राया दुखिता भवति सा प्रथमं "अचिरात् युवयोः समागमः भविष्यति ते प्रियोऽपि त्वमिव

---

5) मेघसन्देश: - प्रथमसर्गः - 57 श्लोक: Page No. 46.

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:8(1), August 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

खिन्नः सोऽपि त्वद्वियोग - दुःखमनुभवति, इदानीं क्षेमवान् वर्तते” इति वचनेन सा आश्वासनीया।

**तामायुष्मान्मम च वचनादात्मनश्चोपकर्तुं**
**ब्रूया एवं तव सहचरो रामगिर्याश्रमस्थः।**
**अव्यापन्नः कुशलमबले प्रच्छति त्वां वियुक्तः**
**पूर्वाभाष्यं सुलभविपदां प्राणिनामेतदेव।।**[6]

अत्र सुलभविपदां प्राणिनां प्रियक्षेमवार्ता कथनेन सामान्येन यक्षपत्न्याः वृत्तान्तः विशेषः समर्थितः इति अर्थान्तरन्यासः इति वैय्यक्तिकहितबोधः। एवं कार्यं कर्तुं कृतनिश्चयः विशेषतः सुहृत्कार्ये प्रवृत्तः विलम्बं कृत्वा कार्यभङ्गं कर्तुं नार्हतीति उपदेशः अपि अर्थान्तरन्यासमुखेन काव्ये बोधितः।

**“मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः”**[7]

---

6) मेघसन्देश: - द्वितीयसर्गः - 40 श्लोक: Page No. 88.

7) मेघसन्देश: - प्रथमसर्गः - 42 श्लोक: Page No. 36.

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:8(1), August 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

### (C) अर्थान्तरन्यासमुखेन आरोग्य विषय प्रतिपादनम्

आरोग्यविषयनिरूपकः अर्थान्तरन्यासोऽपि मल्लिनाथेन तद्विषय निरुपण पूर्वकं व्याख्यातः।

**तस्यास्तिक्तैर्वन गजमदैर्वासितं वान्तवृष्टि**
**र्जम्बूकुञ्ज प्रतिहतरयं तोयमादाय गच्छेः।**
**अन्तः सारं घन तुलयितुं नानिलः शक्ष्यति त्वां**
**रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय॥**[8]

वातपित्रश्लेष्माणः त्रयोदोषाः रोगहेतवः आयुर्वेदे प्रसिद्धाः एव। तत्र जम्बूफलानि वातहराणि इत्यपि सूचयित्वा तत्सेवनेन वातः हतो भवतीति व्यञ्जना वृत्या सूचितः इति मल्लिनाथः स्पष्टम् उक्तवान्।

**अयमत्र ध्वनिः - आदौ वमनशोधितस्य पुंसः पश्चात् श्लेष्मशोषणाय लघुतिक्त कषामाम्बुनाल्लब्ध बलस्य वातप्रकोपो न स्यादिति। यथाह वाग्भटः -**

---

8) मेघसन्देशः - प्रथमसर्गः - 20 श्लोकः Page No. 19.

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:8(1), August 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

**कषायाश्य हिमास्तस्य विशुद्धेः श्लेष्मणो हिताः।**
**किमु तिक्तकषाया वा ये निसर्गात्कफापहाः।**
**कृतशुद्धेः क्रमात्पीयादेः पथ्यभोजिनः।**
**वातादिभिर्न बाधास्यादिन्द्रियैरिव योगिनः इति।।**[9]

## (D) अर्थान्तरन्यासमुखेन मनश्शान्ति साधनम्

मनसः शान्ति सम्पादकाः अपि अर्थान्तरन्यासः मेघसन्देश काव्ये दृष्टाः। प्रायश: दुःखार्तः निर्विण्णो भूत्वा प्राणानपि जिहासति। विरहासहिष्णवः स्नेहः वियोगेन नष्टो भवति इति वदन्ति किन्तु वियोग: प्रीत्याधिक्यस्य अभिवर्धको भूत्वा प्रेम्णः परांकष्ठाम् आरोपयति इति समाश्वासनेन दुःखितानामपि मनसः शान्तिः भवति।

**रातस्मान्मां कुशलिनमभिज्ञानदानाद्विदित्वा**
**मा कौलीनादसितनयने मय्यविश्वासिनी भूः।**
**स्नेहानाहुः किमपि विरहे ध्वांसिनस्ते त्वभोगा**
**दिष्टे वस्तुन्युपचितरसा: प्रेमराशी भवन्ति।।**[10]

---

9) मेघसन्देश: - प्रथमसर्गः - 20 श्लोक मल्लिनाथव्याख्या - Page No. 20.

10) मेघसन्देश: - द्वितीयसर्गः - 52 श्लोक: Page No. 92.

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:8(1), August 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

## उपसंहारः

एवम् अलङ्कारस्य निवेशने कवयः यथा जागरूकाः भवेयुः इति आनन्दवर्धनोक्तिः कालिदासादि महाकविकाव्येषु अलङ्कार निवेशनमनुशील्यैव कृतः प्रतिभाति। अनन्तवर्तिनः सन्देश काव्यानां कर्तारः अपि स्वकाव्येषु तान्येव प्रयोजनानि मनसि कृत्वा अर्थान्तरन्यासादि अलङ्कार निवेशनं चक्रुरिति निश्चप्रचम्।

## उपयुक्तग्रन्थसूची

1. मेघसन्देशः - वाविल्लरामस्वामिशास्त्रुलु & सन्स्, चेन्नपुरी - 1933.
2. काव्यप्रकाशः - चौखम्ब संस्कृत सिरीज् आफीस्, वारणासी - 1987.
3. काव्यालङ्कारः - भामहः - चौखम्ब संस्कृत विद्यालय, वारणासी - 1956.
4. सिद्धान्तकौमुदी - भामहः - चौखम्ब संस्कृत विद्यालय, वारणासी - 1956.